# Dvadashyam Paranayah Purvam Vishnu Stotram

# द्वादश्यां पारणायाः पूर्वम् विष्णुस्तोत्रम्

## Document Information

Text title : Dvadashyam Paranayah Purvam Vishnu Stotram

File name : viShNustotramdvAdashyAMpAraNAyAHpUrvam.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : from Vishnudharma Upapurana. Adhyaya 24

Latest update : December 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

Dvadashyam Paranayah Purvam Vishnu Stotram

# द्वादश्यां पारणायाः पूर्वम् विष्णुस्तोत्रम्

एकादश्युपवासात्परं द्वादश्यां पारणायाः पूर्वं करणीयं विष्णुस्तोत्रम् ।
(VishNu Stotra to be recited after the fast on Ekaadashi,
before PaaraNa on Dwaadashi)

नामत्रयमशेषेषु मासि मासि दिनद्वयम् ।
तथैवोच्चारयेद्दद्याद्द्वादश्यां च यवादिकम् ।
प्रणम्य च हृषीकेशं कृतपूजः प्रसादयेत् ॥ १५॥

विष्णो नमस्ते जगतः प्रसूते
ॐ वासुदेवाय नमो नमस्ते ।
नारायण त्वां प्रणतोऽस्म्यचिन्त्य
जयोऽस्तु मे शाश्वतपुण्यराशेः ॥ १६॥

प्रसीद पुण्यं जयमेतु विष्णो
ॐ वासुदेवर्द्धिमुपैतु पुण्यम् ।
नारायणॐ भूतिमुपैतु पुण्यं
प्रयातु चाशेषमघं विनाशम् ॥ १७॥

विष्णो पुण्योद्भवो मेऽस्तु वासुदेवास्तु मे शुभम् ।
नारायणास्तु धर्मो मे जहि पापमशेषतः ॥ १८॥

अनेकजन्मजनितं बाल्ययौवनवार्द्धिके ।
पुण्यं विवृद्धिमायातु यातु पापं तु सङ्क्षयम् ॥ १९॥

आकाशादिषु शब्दादौ श्रोत्रादौ महदादिषु ।
प्रकृतौ पुरुषे चैव ब्रह्मण्यपि च स प्रभुः ।
यथैक एव सर्वात्मा वासुदेवो व्यवस्थितः ॥ २०॥

तेन सत्येन मे पापं नरकार्तिप्रदं क्षयम् ।
प्रयातु सुकृतस्यास्तु ममानुदिवसं जयः ।

पापस्य हानिः पुण्यं च वृद्धिमभ्येत्यनुत्तमाम् ॥ २१॥

एवमुच्चार्य विप्राय दत्त्वा यत्कथितं तव ।
भुञ्जीत कृतकृत्यस्तु पारणे गते ॥ २२॥

इति विष्णुधर्मेषु चतुर्विंशोऽध्यायान्तर्गतं विष्णुस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

---

*Dvadashyam Paranayah Purvam Vishnu Stotram*

pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*